Airo International Research Journal

Volume XIII, ISSN: 2320-3714
December, 2017
Impact Factor 0.75 to 3.19

ज्ञान-विज्ञान विमुक्तये

UGC Approval Number 63012

# मानवजीवने कर्मलोकस्य वैशिष्ट्यम्

डॉ० जगतनारायण
माँ दुर्गानगर, कुरुक्षेत्र (हरियाणा)

**सारांश**

**मनुस्मृति महत्त्वपूर्ण ग्रन्थ है । भारतीय संस्कृति में वेदों को संस्कृति का आधार माना गया है । स्मृतियाँ भी संस्कृति के आधार एवं प्रमाणिक ग्रन्थ हैं मनु का कथन है कि श्रुति वेद है और धर्मशास्त्र इन दोनों से ही धर्म का प्रादूर्भाव हुआ है। सभी विषयों में इनकी प्रमाणिकता अकाट्य एवं असंदिग्ध है । स्मृति में आचार, सदाचार, संस्कार, नैतिक शिक्षा, वर्णाश्रम धर्म, राजनीति, राज्य शासन विधि, राजा तथा प्रजा के कर्त्तव्य, दण्ड व्यवस्था, विवाद पदों का निर्णय, दाय भाग, साक्षी प्रकरण विविध प्रकार के पाप और उनका प्रायश्चित आदि का विस्तृत विवेचन है ।**

सम्पूर्णे ब्रह्माण्डे प्रकृतौ च अनवरतम् आदान-प्रदान-प्रक्रिया प्रचलति । सा प्रक्रिया लोके यज्ञानुष्ठानरूपेण प्रसिद्धा । यथा श्रुतिः प्रतिपादयति-'अग्निसोमात्मकं जगतेति ।' समग्र जडचेतनानां, भूतानां पदार्थानाञ्च जीवनप्रक्रिया तस्यैव प्राकृतयज्ञस्य इव प्रतिदिनं प्रवर्तत इति विश्रुतः। तं प्राकृतयज्ञम् आश्रित्य तदनुसारं संसारेऽपि जनाः मानवजीवनस्य कृते मंगलकामनया लौकिकपदार्थैः भौतिकं यज्ञं सम्पादयन्ति । यथा प्राकृतयज्ञप्रक्रियया लोकस्य धारणं संरक्षणं च भवति, तेनैव प्रकारेण लोकजीवनेऽपि समेषां कल्याणार्थं बहुयज्ञानां तेषाम् अनुष्ठानानां च परिकल्पना यज्ञाविज्ञैः कृता । अनेन यज्ञानुष्ठानेन लोके सद्भावाश्च आयान्ति, अथ च यज्ञे सम्पृक्तानां जनानाम् आजीविकाऽपि प्रचलति । शुभ संस्काराणाम् आधानमपि यज्ञानुष्ठानेन भवति । एवमेव लोके समाजे च सहास्तित्वस्य भावनाऽपि उदेति; अतः यज्ञानां मानवजीवने महत्योग दानमस्ति इति वक्तुं शक्यते ।

वेदेषु कर्मकाण्ड, उपासनाकाण्डः, ज्ञानकाण्डः, विज्ञानकाण्डश्च एतत् चतुर्णां मुख्यतया वर्णनमुपलभ्यते । किन्त्वेतेषु प्रधानस्थानं कर्मकाण्डस्यैव वर्तते। अतएव वेदेषु यज्ञयागादिकानां विविध क्रियाकलापानां विशेषरूपेण वर्णनमस्ति । अतः निश्चेतुं शक्यते यद्यज्ञैव वेदानां मुख्यो विषयः। तस्य यज्ञस्य आनुष्ठानिकविधय एव कर्मकाण्ड इति उच्यते । कर्म सम्पादनार्थं कर्मकाण्डः । यज्ञेष्वेव वेदमन्त्राणामुच्चारणं भवति। यज्ञाः वेदमन्त्रं विना न भवितुमर्हन्ति। यज्ञानां सम्पादनं यदि मन्त्रं व बिना क्रियते तदा तस्य सदुपयोगोऽपि न भवितुं शक्नोति । ब्रह्मपुराणोऽपि - **"ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये ।"**[1] इति उक्त्वा तद्विषयकं महत्त्वं प्रतिपादयति। ऋग्वेदस्य प्रथमे मन्त्रे- "अग्निमीळेपुरोहितम्"[2] इत्यस्मिन् तस्य यज्ञस्य वैशिष्ट्यं प्राचीनता च प्रमाणितं भवति ।

मानव जीवने न केवलं मानवैरपितु अन्यैर्जीवैः यत्किमपिक्रियते तस्योद्देश्यं केवलं सुख-शान्तिः प्राप्तिरेव । सुख-शान्तिविषये परिभाषयनुक्तम् शारीरिकक्षेत्रे सुखं वाह्यं तथा शान्तिः आन्तरिका जायतेति । 'सुख' शब्दस्य ।

निष्पत्तिः सु = सुष्ठु खं इन्द्रियाणामवस्थानम् अर्थात् पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि एको मनश्च । मनसहितं दशइन्द्रियाणि यदा तृप्तेरनुभवं कुर्वन्ति, तत्सुखमुच्यते । शान्तिः मानसिकचेति । मनः यदा तृप्तिमनुभवति उद्वेगरहितो भवति तदा शान्तिमस्ति इति भाषितुं शक्नुमः ।

य ईश्वरं प्रत्यनुरक्तः तमेवाऽनुदिनं स्मरति तस्यैव मनन-स्मरणं-चित्तञ्च करोति स एव यज्ञयोजनस्याधिकारी भवति। एवंभूतस्य जनस्य यजनं भगवदर्चनं वन्दनंयज्ञसंपादनं प्रभृति सर्वाणि कार्याणि यज्ञमयमेव ज्ञायते । स यत्करोति, यदश्राति, यज्जुहोति तस्य प्रत्येकं क्रम, यज्ञमयमेव । यतो हि स स्वस्य इति भावं समर्पयिता भवति, अहमित्यस्य सर्वथात्यागं करोति, तस्य पार्श्वे स्वस्य कृते किमपि स्पृहा न भवति । निरहंकारी, निष्कामी, निर्लोभी, निर्देषी-इत्यादिभिर्गुणैरयुक्तं जनः

भगवत्प्रियो भवति । यद्यपि स तदवस्थायां सर्वकामना रहितो जातः तथापि लोकशिक्षणाय परोपकाराय च स यज्ञस्यानुष्ठानमाचरति च ।

नरत्वं दुर्लभं लोके विद्यास्तत्र सुदुर्लभाः इत्यस्मिन् पद्ये इदं स्पष्टंमस्ति यत् जीवनं तु विशिष्टं भवत्यैव तस्मिन् संस्काराणां प्रयोगेण सजीवता प्रधानता च आयाति । चित्रकर्मणि वर्णानान् प्रयुक्त्वा चित्रकारः सौन्दर्यं उत्पादयति तथैव मानवजीवने विभिन्नैः संस्कारैः अनेकानां गुणानाम् आधानं भवति । अतः कर्मकाण्डेन मानव जीवने संस्कारस्य महत्त्वं प्रदर्शितम अस्ति ।

उक्तं च पञ्चमहायज्ञ विषये –

**अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम् ।**

**होमो देवोवलिर्भूतौ, नृयज्ञोतिथिपूजनम् ॥**[3]

शतपथ ब्राह्मणेऽपि कथितम् –

"पञ्चैव महायज्ञाः, तान्येव महासत्राणि, देवयज्ञो, भूतयज्ञो, मनुष्ययज्ञो ब्रह्मयज्ञ इति" इत्थं उपर्युक्तान् श्रेष्ठाचरणान् सम्पादितवन्तः जनाः वैदिकधर्मस्य रक्षकाः सन्ति ।

मन्त्रस्येदं तात्पर्यमस्ति यथा सूर्यः द्युलोकं धारयति तथैव सत्यवक्ता, यज्ञकर्ता च मनुष्याः पृथ्वीमिमां सर्वथा धारयन्ति। सूर्यस्यार्चनं कोऽपि करोतु न वा किन्तु सः सर्वेभ्यः प्रकाशमेव प्रयच्छति, त्रिलोकं प्रकाशते तथैव मानापमानस् चिन्तां विहाय प्रसन्नचेत्तो भूत्वा शास्त्रविहितान् कर्माणि कुरुते सज्जनः ।

ये जना उपरोक्त गुणान् धाययन्ति ते एव पृथ्वीमिमां धारयिताः भवन्ति अयम्भावःमन्त्रस्य । येते गुणः स्वयमेव न आगमिष्यन्ति तत्कृते तु पञ्चमहायज्ञानां महती भूमिका भवत्येव ।

1. ब्रह्मयज्ञः – ज्ञानोपासनम् ।
2. पितृयज्ञः – मातृपितृणामाज्ञापालनम् ।
3. अतिथियज्ञः – अभ्यागतानां ससम्मानं स्वागतम् ।
4. भूतयज्ञः – सर्वप्रकारस्य प्राणिनां पोषणम् ।
5. देवयज्ञः – अग्नौ हवनाहुति प्रदानम् ।

शास्त्रे लिखितमस्ति यत् यः पञ्चमहायज्ञं करोति तत्कृते न दुर्लभं भवति किञ्चित् । पञ्चममहायज्ञविषमे उक्तं च अध्यापन ब्रह्म यज्ञः–पूजनम्।। अभूतपूर्वमस्ति योगदानं समाजाय पञ्चमहायज्ञानाम् ।अमुमेव लक्ष्यं दृष्टौनिधाय शास्त्रेषु स्मार्तकर्मणां वर्गीकरणं कृतमाचार्यवयैः । उक्तञ्च यथा – क्रियारूपस्य धर्मस्य बहुरुपत्वेन कर्मणामन्त्ये स्मार्तकर्म वर्गीकरण विषये विचार्यमाणे याज्ञवल्क्य स्मृतेः काण्डत्रये विभक्तत्वात् आचारकर्मणि व्यवहारकर्मणि, प्रायिश्चित्तकर्मणि चेति त्रिधा विभागाः इति वक्तुं शक्यते –

1. तत्र आधारकर्षेषु –

(क) संस्काराः (ख) आचाराः (ग) दानम् (घ) श्राद्धम् (ङ) शान्तिः (च) व्रतम् (छ) प्रतिष्ठा (ज) उत्सर्गः।

2. व्यवहार कर्मषु –

(क) राजधर्माः (ख) समाज व्यवस्था (ग) दायभागः (घ) आखेट प्रभृतयः ।

3. प्राश्चित्त कर्मसु –

(क) तपः (ख) प्रायिश्चतम् (ग) शुद्धिश्चेति

**संस्कार लक्षणम् :**

आत्मशरीरान्यतरनिष्ठः विहित क्रियाजन्योऽतिशयविशेषो संस्कारः । पुनः स च द्विविधः । यथा –

1. एकस्वावत् कर्मान्तराधिकारेऽनुकूलः । यथोपनजन्यो वेदाध्ययनाधधिकारा– पादकः ।
2. अपरस्तु समुत्पन्न दुरितनाशकः यथा जीवगर्भ समुद्भवैनी निर्वहणो जातकर्मादिजन्यः । इतिफलविधया द्विविधोऽप्ययं संस्कारोऽन्यापि विधया विभिद्यते।

**संस्काराः**

स्मार्तकर्मषु मानवानामभ्युदयाय क्रियमाणेषु संस्काराख्यं कर्मकाण्ड प्रधानेन संस्कार पदार्थ चानेकविधया विभाजितः । ते च द्विविधा-ब्राह्म, दैवाश्चा । तथा च हारीतः-द्विविधो हि संस्कारो भवति ब्राह्मो दैवश्चेति । तत्र ब्रहमः गर्भाधानादयाः तथा च हारीतः गर्भाधानादिः । स्मार्तो ब्रह्म सनानान्त इति चेत् पञ्चविंशतिः तदुक्तं वीरमित्रोदये -

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।

उपनिषदि गोदानानि, स्नानं समावर्तनम् । आग्रायणं, नवान्नेष्टिः, अष्टका, हेमन्त-शिशिरयोश्चतुर्णामपर पक्षाणामष्टमीषु विहितानि श्राद्धानि । श्रावण्यां क्रियमाणं श्रवणा कर्म, एवमाश्वयुजयामाश्वयुजीक मार्गशीर्ष्या स्रस्तरारोहणकर्म, पार्वणं वै अमावस्यायां क्रियमाणश्राद्धम् । उत्सर्गो वेदानामुत्लासर्जमिति पाकयज्ञाद्याः दैवा तथा च हारीतः - पाकयज्ञा, हविर्यज्ञा सौम्याश्च देवाः इति । सौम्याः सोमयागः अग्निष्टोमादयः ।

आचारः-

स्मृतिशास्त्रेषु आचारस्य महद्वैशिष्ट्यं वर्णितं विद्यते । यथा-

**उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।**
**वेदमध्यापयेदेनं शौचाचाराश्च शिक्ष्ययेत् ॥**[4]

इति याज्ञवल्क्ययस्मृतौ वचनात् उपनयनान्तरं वर्णधर्मान् वर्जयित्वा शौचानामाचाराणां च शिक्षणमुक्तम् । स्त्रीणामप्येतत् विवाहादर्वाक् उपनयन स्थानीयत्वाद् विवाहस्य इति मिताक्षरायामुक्तेः स्त्रीणमप्याचार प्रशिक्षणं स्पष्टमेव स्त्रीशूद्राश्च सधर्मणः इति समान न्यायात् शूद्राणमपि आचार परिज्ञानं युक्तमेव।

अतेव महाभारते

**आचारः परमोधर्मः धर्मस्यप्रभुरच्युतः ।**[5]

आचारभेदाः -

मिताक्षरायां विज्ञानेश्वरमतेन आचारस्तु षड्विधोक्तम् यथा- तत्र वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति।"[6]

**वैदिकसिान्तोपवृंहणे श्रीमद्भागवतेऽपि सदाचार वर्णनामाश्रमाणां वर्णनं विस्तारेण वर्णितम् ।**

**दानम्** -

दानेन सर्वान् कामानवाप्नोति चिरञ्जीवित्वमिति - देवांश्च याभिर्यजते ददाति च गोत्रिभिः सचते गोपतिः सह । इति तैत्तरीय शाखामात्रे व्यासः । तात्पर्यभिदमास्ति काप्यवस्था भवेत् किञ्चित न किञ्चित् दानमवश्यमेव देयम् । रागः चेन्तर्हिधर्मेषु, चिन्ता चेदस्ति तर्हि दानस्य, व्यसनमप्यस्ति तर्हि दानस्य विषयेषुचेत् वैराग्य स्मात्तदा सर्व प्राप्तमिति मन्तव्यम् ।

**धर्मे रागः श्रुतौ चिन्ता दाने व्यसनमुत्तमम् ।**
**इन्द्रियार्थेषु वैराग्यं सम्प्राप्तं जन्मनः बलम् ॥**

श्राद्धम् -

श्राद्ध विषये मरीचिः पृथ्वीचन्द्रोदयेतत्स्वरूपमाह- "प्रेतं पितृंश्च निर्दिष्य भोज्यं यत्प्रियजनानां कृते श्रद्धया दीयते तच्छ्राद्धंपरिकीर्तितम्" एवं च "ब्राह्मणाश्चतुर्थ्यन्त्यदीपनी तमृतोद्देश्यकस्त्यागः श्राद्धमित्यर्थः" ।

महर्षि दयानन्देनोक्तम् - "पुत्रेण पितृभ्यां यज्जीवने श्रद्धया दीयतेसेवां कुरुते चेति तच्छ्राद्धम् ।" पुत्रः स्वश्रमार्जितं धनं पितृभ्यां सर्वात्मा समर्पयति । तत्र तस्य भावो विद्यते खलु एतद्वनम् मम नास्ति । एतत्तु सर्व भवत्यः एवास्ति अतः स न मम इति उक्त्वा समर्पयित्वा चानन्दमनुभवति । यत्र कोऽपि स्वं धनं मन्यते तत्र त्यागे दुःखं क्लेशो वा जायते पुनः । श्राद्ध विषये बहूनि मतमतान्तराणि प्रचलितानि सन्ति ।

**श्राद्धभेदाः**

धर्मशास्त्रेषु निबद्धाः श्राद्धानां द्वादश विभागा तेषां प्रयोजनम् चाऽप्युक्तम् । श्राद्धविषये विश्वामित्रवचनम् -

Airo International Research Journal
Volume XIII, ISSN: 2320-3714
December, 2017
Impact Factor 0.75 to 3.19
UGC Approval Number 63012

**कर्म नवमं प्रोक्तं दैविकं दशमं स्मृतम् ।**
**यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशस्मृतम् ॥**

शान्तिकम् –

**स्पष्टपापनिदानकं ऐहिकमनिष्टनिवर्तकं पापप्रयोजकंवैधकर्म शान्तिकमुच्यते।**

शान्ति भेदा –

शान्तयश्च विभिन्नाः । शान्तेरावश्यकता न तु आधुनिकी । स तु पुरातनी एव । अतः कालानुसारेण शान्ति सिद्धयर्थं मानवैः अनेकानेन विधानानि विहितानि तत्कृते विविधानि पुस्तककानि लिखितानि । यथा – शान्तिकमलाकरः, शान्तिमयूखः, सत्यार्थ प्रकाश, शान्तसागर प्रभृति महानिबन्धेषु प्रतिपादिताः एतेषां वर्गीकरणमेवभवितुं जायते । तत्र विविधानि विषयानि सन्ति । यथा –

1. **जननशान्तयः**

आसामनुष्ठानं जननिमित्तमादाय प्रवर्तते । जननक्रियायां यदा गृहे वाधाजायते खलु तत्र जननशान्तिं कृत्वा गर्भपातादि उपद्रवेषु शान्तिर्भवति ।

2. **वयः शान्तयः**

षष्ठ्यब्दादौ शरीरवस्थाविशेषेण प्रवर्तमाना उदरस्थ शान्त्यादयः । अत्र्यौगिकक्रियाया आपेक्षा जायते ।

3. **अदभुतशान्तयः**

औत्पत्तिकं निमित्तं उल्कापातादि प्राकतिकविपद्विहिता शान्तयः अद्‌भुतशान्तयः उच्यन्ते ।

4. **परिस्थितिशान्तयः**

अशौचादि प्राप्तौ विवाहादिकर्तव्यतायां, मण्डपे कन्या यद्वा कन्यायाः मातुः रजस्रावे चेत्येवमादिविशेष परिस्थितिषु विहिताः परिस्थितिशान्तयः क्रियन्ते।

**व्रतम् :**

यमनियमादि पालनं व्रतमिति सामान्यतयाभिधीयते । परं विशेष कालार्थतया, विशेषनिमित्तेषु विशिष्ट योगे वा विहिताचारव्यवहाराशनादिभिरव– स्थानं व्रतीति पारिभाषिकोऽर्थः । अस्माकं भारतीयेषु प्रत्यहं केचन व्रतविधयः प्रवर्तन्त एवं शास्त्रेषु अथापि देशभेदेन कुलभेदेन या तेषुकतिपयानामेवानुष्ठान– माचरन्ति शिष्टाः एतेषां च बहुलत्वात्सर्वेषां निर्देशस्य प्रकृतानुपयोगित्वाञच नात्रविवरणं क्रियते । केचन संदिग्ध विषया एव विव्रियन्ते ।

**उत्सर्गाः**

भारतीय कर्मकाण्डे उदारचेतसानां भूयशः समादरो दृश्यते। समाजे समादरस्यकारणमपि उत्सर्गभावः एव । यः जनः अलोलुपत्वादन्येषां हितसाधनं करोति तेषां कृते धनव्यं करोति तस्य उत्सर्ग संज्ञा विधीयन्ते बुधैः । सर्वविध जीवानां कल्याणं भवेत्युदद्देश्येन सदा स्वत्वनिवृत्तितया व्यवस्थापनमुत्सर्गः । अतः एव उत्सर्ग विधिः एव परिचीयते । यथा–

(1) तडागोत्सर्ग (जलाशयोत्सर्गः) (2) घट्टोत्सर्गः (3) कक्षोत्सर्गः (4) शालोत्सर्ग (धर्मशालाया उत्सर्ग) (6) प्रसादोत्सर्गः (पाठशाला चिकित्सालपादीनाम्) (6) नगरोत्सर्गः (7) वृषोत्सर्गः (8)चन्दन धेनूत्सर्गः इत्यादि ।

**प्रायश्चित्तकर्माणि :**

महर्षि दयानन्दः प्रायश्चित्त विषये उक्तवान् यत् कर्मभोगेन बिना कर्मप्रभावः नैव विनश्यति । प्रायश्चित्तस्य भावः क्रिया परिवर्तनं सुधारो वा न तु परिहारभावः इति ।

**कर्मकाण्डविधाः**

वैदिककर्मकाण्डस्तु श्रौतस्मार्तभेदाभ्याम्मुख्यतः द्विविधौ स्तः । अनन्तरं तेषां बहूनि भेदापभेदानि भवन्ति । यद्यपि तेषां सङ्कलनं श्रौतसूत्रेषु चोपलभ्यन्ते । तेषां प्रतिपाद्य विषयानामुल्लेखमत्र विहितम् । यथा –

(1) संस्काराः (2) और्ध्वदेहिकम् (3) व्रतविधिः (4) सोधनम् (5) दानम् (6) शान्तिः (7) उत्सर्गः (8) पूजा (9) यागाः (10) पुरश्चरणम् (11) जयः (12) आचारः (13) शुद्धिः (14) परिचर्या इति ।

प्रायः सर्वेप्राणिनः सुखार्थ प्रयतन्ते दुःखञ्च कथमपि । किन्तु प्राक्कालिक कर्मवशात् सुख-दुःखयो स्वाभाविकी प्राप्तिर्भवति । अथापि शास्त्रीय प्रक्रियानुसारेण प्रारब्धवशात् प्राप्यमाणमपि दुःखं तालवृक्षं सदपि तिलायते सुखं च सर्वप्रतिपादितमपि हिमांचली क्रियते ।

स्मृत्यादीनां प्रामाण्यस्य मीमांसकैः स समारम्भं साधितत्वात् ।

अतेव मनुनोक्तम्"[7] मनु शब्दः सर्वस्मृतिकाराभिप्रायशः ततश्चाऽत्र एकत्वमप्य विवक्षितम् । याज्ञवल्क्यीये धर्मशास्त्रप्रभावेजकानां बहूनां युक्त्वात्॥

तथाहि-

मन्वत्रिविष्णुहारीत याज्ञवल्क्योशनोडिगराः यमापस्तम्ब संवर्ता कात्यायन, वृहस्पतिः, पराशर, व्यास, शंखलिखितौ, दक्षः, गौतमौ, वशिष्ठश्च, वशिष्ठश्च धर्मशास्त्र प्रवर्तकाः ।[8]

तेषां वाक्यार्थान्ते सन्दिह्यते तात्पर्य नावबुध्यते तदर्थं सर्वदेशीयैरपि भारतीयै विद्वद्भिः तन्निर्णयाय मीमांसाशास्त्रस्याश्रयणं कृतम् ।

पुराणं मानवोधर्मः सांगोवेदश्चिकित्सितुम् आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः इति महाभारते । तद्विरोधिनः जैन बौद्धादि तर्कैर्न स्वमतं स्थापयितुं समर्थाः । अनुकूलस्तु मीमांसकादि तर्कः प्रवर्तनीय एव । अतएवोक्तम्मनुः ।[9] एवं च मीमासोपवृहितं धर्मशास्त्रण निर्णीतं कर्मानुष्ठानं तस्मादेव च-श्रुति स्मृति उदितं धर्ममनुतिष्ठन् हि मानवः स जीवन्सुखमाप्नोति परत्र च परांगतिम्। इत्यनिष्ठं बोधयन्ति सर्वानपि मानवानभिधत्ते इति एवं शस्त्रनिर्देशः सर्वथा सर्वदा हितावहः इति सिद्ध्यति। निरन्तरं प्रयतते । स हि अवनति फलकादैहिकादामुष्मिकाद्वा नरकाद् सर्वदैवदूरं स्थातुं कामयते अतएव सः सुखशान्त्ययाश्रयं स्वर्ग सर्वेदा कामयते तथा च स्वर्ग लक्षणम् - सुखशान्त्योः प्रतिव्यक्तिभिन्नोऽपि सर्वसाधारणतया मनुष्य मात्रोभिज्ञातोऽमिलषितश्च ।

मानुष आनन्दः वेदे बहुधोऽपस्थाप्यते-षट् पदार्थाः मानुषे आनन्दे परिचायिताः भवन्ति । स्वास्थ्यम्, शिक्षा, शौर्यम्, बलम्, सम्पत्तिः भोग इति एतेषामभिलाषो मानवस्य स्वाभाविकः वेदे उपरोक्त विषयकं चिन्तनम् बहुधा कृतम् । यैः मानवः जीवनपर्यन्तं सुखं लभेत् ।

मानवसदृशमेव पशुपक्ष्यादयोप्यानन्दं कामयन्ते । यद्यपि सन्ति तेषां सविधेऽप्यानन्दानुभवसाधनानीन्द्रियाणि परन्तेषां सुगमोपायानामस्त्यभावः । पशवादयो हि आसन्नस्वेव पदार्थेषु चेतयन्ते आनन्दप्राप्ति समुपादयिक कर्मणांकृते मानवीयगुणानामेवावश्यकीयावश्यकता । अतैव ते शास्त्रवोधितेषु कर्मसु नाधिक्रियन्ते ।

मानवस्य विशेषगुणोऽस्ति ज्ञानम् स ज्ञानवलेन स्वकार्याणि सम्पादयति । जीवने कर्मप्रभावो एव सर्वत्र दरीदृश्यते । यस्य कर्म यादृशः तस्य फलमपि तादृशमेव भवति । अतएव आवश्यकता वर्तते कर्मकाण्डस्य सम्यक् ज्ञानस्य येन जीवने सुखसमृद्धिं आयाति तिष्ठति च ।[10]

वैदिक संस्कृतेः मेरूदण्डः यज्ञसंस्था एव यत्कोऽपि ईदृशं कथयति तर्हिकापि अन्योक्तिनास्ति इति इथं कथमितुं शक्नुमः यतोहि शतपथादि ब्राह्मणग्रन्थानां वर्णनस्यापि मुख्योआधारः उपनिषत्कारस्य व्यापकरूपमणि स्वीकृतम् तथाचास्माकं षोडशसंस्काराणामाधारस्तम्भ एव वर्तते । मनुष्यजीवनस्य प्रमुखगुणोऽस्ति ज्ञानम् सज्ञानबलेन स्वकार्याणि सम्पादयति । मानवजीवने क्रमप्रभाव एव सर्वत्र दृश्यते । यस्य कर्म यादृशः तस्य फलमपि तादृशमेव भवति । अतः कर्मकाण्डस्य सम्यक् ज्ञानस्य येन मनुष्य जीवने सुखसमृद्धिं आयाति तिष्ठति च । अत-एव कर्मकाण्डस्य महती आवश्यकता वर्तते ।

**"यज्ञो वै श्रेष्ठतमं कर्म"**[11]

**"वेदाः हि यज्ञार्थ मभिप्रवृत्ताः"**[12]

इत्यादयः श्रुतिवचनैः इदं प्रमाणितं भवति यत् यज्ञारेव मानवजीवनस्य आधारभूतं तत्त्वं वर्तते । यस्य प्रभावेण मानवाः संस्कारसंयुक्ताः भूत्वा मानवजीवनस्य अभिष्टोद्देश्यं प्राप्नुवन्ति वेदाधारितप्रमाणैः कर्मकाण्डस्य प्रयोगः अस्मिन् जगति पदे-पदे दरीदृश्यते । वेदानां चत्वारः भागाः सन्ति । तेषु भागद्वयं कर्मकाणाय भागद्वयं उपासना ज्ञानकाण्डयोः समर्पितः अस्ति ।

संहिता ब्राह्मण भागस्य प्रयोगः काण्काण्डाय भवति । यजुर्वेदे एव कर्मकाण्डस्य कृते अधिकाः मन्त्राविधयश्च प्राप्यन्ते। यजुष् शब्दस्य अर्थः 'यज्ञः इति सुविदितमस्ति । वैदिकवाङ्मये नित्य-नैमित्तिक-काम्यभेदैः त्रिविधाः यज्ञाः स्वीक्रियन्ते । तत्र नित्यकर्मण्डाडभागे पञ्चविधाः यज्ञाः उल्लेख्यन्ते। ब्रह्मयज्ञः, देवयज्ञः पितृयज्ञः अतिथियज्ञः बलिर्विश्वदेवयज्ञश्च एतेषु यज्ञेषु कर्मकाण्डीय मन्त्राणां प्रयोगः क्रियते । येन सृष्ट्याः पारस्परिकम् अन्योन्याश्रितावश्यकतायाः भावः उद्घोषितः भवति ।

## संदर्भ

1. ब्रह्म पुराण, 1/49
2. ऋग्वेद संहिता, 1/1/1
3. महाभारतम् ।
4. मनु०, 2/16
5. या० स्मृ० 111
6. भागवत पुराण 6.2.6
7. मनु स्मृति 2.7
8. तदेव, 1.4-5
9. तदेव
10. श्रीमद्भागवतपुराण 10/23
11. श० प० ब्रा० 1/7/1/1
12. वेदाङ्गज्योतिष